International Journal of Multidisciplinary Horizon

ISSN:3049-2017
IJMH 2026; 3(1): 04-06
© 2026 IJMH
www.themultijournal.com
Received: 13-12-2025
Accepted: 05-01-2026
Publish : 06-01-2026

**Krishnananda B M**
Research scholar,
DoS in Sanskrit,
University of Mysore,
Manasa Gangotri

**Correspondence:**
**Krishnananda B M**
Research scholar,
DoS in Sanskrit,
University of Mysore,
Manasa Gangotri

# प्रोषितागमने कालनिर्णयविमर्शः

**Krishnananda B M**

**लेखनसारः (Abstract) :-**

ज्योतिःशास्त्रे प्रोषितप्रश्नः गरिमाणम् आवहति । अस्मिन् प्रश्नविभागे प्रवासगतः आयास्यति वा न वा? बद्धः वा? मृतः वा? जीवति चेत् पुनरागमनं कथम्? केन यानेन आगमिष्यति? कदा आगमिष्यति? इत्याद्यंशाः विव्रियन्ते । याता कदा आगमिष्यति ? इति वक्तुं नैकप्रकाराः विशदीकृताः शास्त्रग्रन्थेषु । कालपरिज्ञानविषये होराग्रन्थेषु प्रश्नग्रन्थेषु अन्यद्विषयव्याख्यानावसरे अपि शास्त्रकाराः प्रास्तुवन् । तान् कान्श्चन अंशान् एकत्र सङ्कलय्य विव्रियन्ते ।

**कूटशब्दाः (Key words) -** ज्यौतिषम्, प्रोषितः, लग्नम्, राशिः, नवांशः, आगमनम्, प्रश्नशास्त्रम्

## १. पीठिका

प्रोषितागमप्रश्ने पृच्छकः दैवज्ञमुपगम्य प्रवासगतस्य विषये अनेकान् प्रश्नान् आक्षिपति । तेषु प्रश्नेषु 'सः कदा आयास्यति' निश्चयेन अन्तर्गतो भवति । तस्मात् प्रश्नग्रन्थेषु तथा च होराग्रन्थेषु अस्मिन् विचारे कीदृशाः नियमाः उररीकृताः इति अत्र विविच्यन्ते ।

## २.प्रोषितागमनकालज्ञानम्

अस्मिन् विचारे पूर्वोक्तवत् नैके प्रकाराः विद्यन्ते । ते अत्र अवलोक्यन्ते ।

### २.१ चरस्थिरद्विस्वभावराशिवशात् कालज्ञानम्

जम्बुनाथः प्रश्नसारसमुद्रग्रन्थे नान्यग्रन्थोक्तविषयं विशेषतया वक्ष्यति _

**चरांशस्थे ग्रहे तस्मिन् कालमेवं विनिर्दिशेत् ।**
**त्रिगुणं स्थिरभांशस्थे द्विगुणं द्यात्मभांशगे ॥**[1]

प्रश्नलग्नात् चरराशौ ग्रहः स्थितः चेत् तत्सङ्ख्याकदिने, स्थिरराशिः चेत् तत्सङ्ख्याः त्रिभिः गुणिताः चेत् यावद्दिनानि भवन्ति तस्मिन् दिने, उभयराशौ भवति चेत् द्विगुणितदिने सः पुनरायाति इति ज्ञेयम् ।

### २.२ बलयुतग्रहात् कालचिन्तनम्

प्रश्नचण्डेश्वरनामकग्रन्थे बलिष्ठग्रहवशात् यातुः आगमनसमयं निश्चेतुम् उपायमाह -

**सर्वोत्तमबलो लग्नाद्यस्मिन् स्थाने ग्रहः स्थितः ।**
**मासैस्तत्तुल्यसङ्ख्याकैः निवृत्तिं यातुरादिशेत् ॥**[2]

प्रश्ने सर्वोत्तमबली ग्रहः यः भवति, स ग्रहः लग्नात् कस्मिन् भावे भवति, लग्न-बलग्रहस्थभावयोः मध्ये कति भावाः भवन्ति, तद्भावसङ्ख्याम् आदृत्य यातुः आगमनसमयं निर्दिशेत् इति भणति । उदाहरणार्थं, तत्प्रश्ने सूर्यः यदि बलवान् भूत्वा सप्तमराशौ अवतिष्ठते तदा सप्तमे मासे याता पुनारायाति इति ब्रूयुः इति आशयः ।

अस्मिन् विषये दैवज्ञवल्लभग्रन्थे वराहमिहिरः अपि एवमेव स्वभावं प्रकटयति -

**बलेन सर्वोत्तमतामुपागतो**

**ग्रहो गृहे यावति लग्नतो भवेत् ।**

**प्रवासतस्तत्समसङ्ख्यमासतो**

**निवर्तनं गन्तुरसंशयं वदेत् ।।**[3]

इहापि प्राश्नचण्डेश्वरोक्तांशः वराहमिहिरेण आदावेव प्रकटीकृतः । ग्रहवशात् कालं ज्ञातुं अत्र बृहज्जातके वराहमिहिरोक्त 'अयनक्षण-मास' श्कोकस्य समन्वयः भवति। किन्तु प्रश्नचण्डेश्वरग्रन्थे अन्यः प्रकारः एव विशदीकृतः ।

अत्रः अपरः प्रश्नः समुदेति । कस्मिन् मासे इति वक्तुं शक्यते इति अवगतम् । कथं कस्मिन् दिने, कस्मिन् वर्षे आगच्छति इति वक्तुं शक्यते वा इति । तस्मात् श्लोकाभ्यां द्वाभ्यां सन्देहं परिहरति प्रश्नचण्डेश्वरकारः -

**चन्द्रे दिनानि वाच्यानि भानौ मासावधिं वदेत् ।**

**जीवे प्रश्नगते चैव वर्षमात्रं विनिर्दिशेत् ।।**

**अष्टमासावधिर्लाभो भौमे लग्ने समादिशेत् ।।**

**बुधे मासावधिर्भृगौ राहौ लग्नगते तथा ।**

**विचार्य सुमहद्बुद्ध्या ब्रूयात् सर्वं सुनिश्चितम् ।।**[4]

यदि बलवान् चन्द्रः आस्ति तदा दिनानि, सूर्यः चेत् मासाः, गुरु बलिष्ठः चेत् संवत्सराः, बली कुजः लग्नगतः चेत् अष्टमासावधिः, बुधः चेत् मासावधिः, शुक्रः चेत् संवत्सरावधिः, राहुकेतू चेत् मासाः च इति आदेश्याः भवन्ति ।

**२.३ लग्न-चन्द्रान्तरभावगणितवशात् कालचिन्तनम्**

अन्यः प्रकारः प्रश्नचण्डेश्वरग्रन्थे पठितः -

**विलग्नचन्द्रान्तरभागनिघ्नं**

**यात्राविलग्नेष्टमिहाग्निभक्तम् ।**

**आयाति राज्यं खलु लब्धमासैः**

**दिनैर्घटीभिश्च यथा प्रदेशम् ।।**[5]

अत्र लग्नात् चन्द्रः कस्मिन् भावे स्थितः इति अवलोक्य, तत्स-ङ्ख्यामादाय, तत्सङ्ख्यां सूर्योदयादिष्टप्रश्नलग्नघटिकाभिः सङ्गुण्य, सङ्ख्यात्रिभिः विभज्य, या सङ्ख्या लभ्यते तद्वर्षमिति स्वीकृत्य, तदनन्तरं अवशिष्टसङ्ख्यां त्रिंशत्सङ्ख्याभिः सङ्गुण्य, पुनः त्रिभिः विभज्य तदा या सङ्ख्या लभ्यते तद्दिनमिति प्रकल्प्य, तावद्वर्षानन्तरं तस्मिन् दिने याता पुनरायाति इति ब्रूयात् इति आशयः ।

उदाहरणार्थं - लाग्नात् चन्द्रः दशमे भावे स्थितः इति जानातु। अनन्तरं सूर्योदयात् दशमघटिकायां प्रश्नः प्रारब्धः । तदा १०×१०=१०० भवन्ति । पुनः १००÷३ =३३ भवति । ३३ नाम २ संवत्सराः तथा च ९ मासाः भवन्ति । अवशिष्टसङ्ख्या १ भवति । पुन १×३०=३० भवन्ति । तदा ३०÷३ = १० भवन्ति । तेन याता २ संवत्सरानन्तरं, ९ मासानन्तरं १० दिने पुनरायाति इति भणितव्यमिति आशयः ।

**२.४ लग्ननवांशाधिपवशात् कालज्ञानम्**

होराशास्त्रे प्रोषितागमनदिनविषये यदुक्तं तदेव स्वीकृतमिति नास्ति । सङ्ख्यादिविषये अन्यत्र कथितमपि अत्र अध्याहार्य, सम-न्वेतु शक्यते । बृहज्जातकस्य जन्माध्याये अयं श्लोकः जातवृक्षसङ्ख्यां व्याहर्तुं उपयुक्तः । तस्य श्लोकस्य अन्वयं कालज्ञानार्थमपि कुर्वन्ति दैवज्ञाः -

**लग्नाद्बहस्थलजलर्क्ष पतिस्तुयावां**

**तावन्त एव तरवः स्थलतोयजाताः ।**[6]

लग्ननवांशाधिपतिः लग्नात् कस्मिन् भावे स्थितः इति दृष्ट्वा तद्भावसङ्ख्यां गृहीत्वा, ततः प्रोषितागमनदिनं पूर्वोक्तं 'अयनक्षण-मासर्तवो' श्लोकसूत्रमाधारीकृत्य वक्तुं शक्यते ।

अयमेव आशयः सारावलीग्रन्थकारेण अपि समुदीरितः -

**लग्नाधिपतेस्तुल्यः कालो लग्नोदितांशकसमाख्यः ।**

**वक्तव्यो रिपुविजयो गर्भेषु च कायसंयोगे ।।**[7]

कालः लग्नाधिपतिं निमित्तीकृत्य चिन्त्यम् । कः समयः इति निर्देष्टुं पूर्वकृतव्याख्यानानुसारं विचिन्तनीयम् । अयमन्यो प्रकारः ।

**२.५ सप्तमाधिपतिवशात् कालज्ञानम्**

प्रश्नशिरोमणिनामके ग्रन्थे सप्तमाधिपवशात् कालं ज्ञातुं प्रोषितप्रश्ने अयं श्लोकः समुदीर्यते -

**यदा सप्तसपो वक्री खेटो भूयात्तदागसः**[8] ॥

यदा सप्तमाधिपः वक्री भवति तदा एव याता पुनरायाति इति ब्रूयात् इति उदीरितम् । किमर्थं सप्तमाधिपतिः इति उक्तं चेत् इति प्रश्नः समुद्भवति । किमर्थम् एवमुक्तम् इत्युक्ते सप्तमभावः यात्रा-भावः।

तदेव उक्तं प्रश्नमार्गे -

**विवाहमदनालोकभार्याभर्तृसमागमः ।**

**शय्यास्त्री सद्मनष्टार्थ मैथुनान्यपि सप्तमात् ।**[9]

अत्र समागमः पदद्वारा गमनागमनं व्यपदिष्टम् । तस्मात् प्रश्नशिरो-मणिकारः विशेषेण सप्तमभावाधिपतिवशात् कालज्ञानस्य अवकाशः भवति इति समादिष्टवान् ।

**२.६ लग्ननवांशवशात् कालज्ञानम्**

पूर्वोक्तवदेव वृहज्जातके जन्माध्याये लग्ननवांशवशात् जातवृक्षसङ्ख्यां निश्चेतुम् अपरः अंशः व्याह्रियते वराहमिहिरेण

**परांशके यावति विच्युतः स्वकात्**

**भवन्ति तुल्याः तरवः तथावुधाः ।।**[10]

अत्र लग्ननवांशाधिपतिः स्वकात् कस्मिन् नवांशे भवति तत्सङ्ख्यामुपयुज्य, तद्ग्रहसूचितकालभागं स्वीकृत्य तत्समये याता पुनः आयास्यति इति आदेष्टव्यम् । अस्मिन् विचारे प्रश्नमार्गे अपि एवं समसूचि-

**लग्ने यावनुदेत्यंशः तत्सङ्ख्याग्नोयनादिकः ।**

**कालो वाच्योंशकेशस्य कार्ये वैरिजयादिके ।।**[11]

यत् वराहमिहिराचार्येण बृहज्कातके कथितं तदेव प्रश्नमार्गकारः अस्मिन् श्लोके निरूपितवान् कालपरिज्ञानार्थम् इममुपायमपि परिगणितुं शक्यते ।

**२.७ चन्द्रस्थितराशिवशात् कालज्ञानम्**

प्रश्नज्ञानप्रदीपग्रन्थे अन्यमंशं व्याख्याति ग्रन्थकृत् -

**चन्द्रस्थार्कर्षादुदभयं यावत्तावत्फलं वदेत् ।**

**चरस्थिरोभयोवशात् एकद्वित्रिगुणो भवेत् ।।**[12]

चन्द्रस्थितराशितः लग्नं कुत्र अस्ति इति प्रपश्य, तावत्काले प्रोषितः पुनः आगमिष्यति इति दैवज्ञः आदिशेत् फलचिन्तनावसरे । लग्नराशिः चरराशिः चेत् लब्धदिनानि एकेन, स्थिरराशिः चेत् द्विसङ्ख्याभ्यां, उभयराशिः चेत् त्रिभिः लब्धदिनानि सङ्गुण्य कालनिश्चयः कार्यः भवति । अत्र वर्ष-मास-दिनादिकं ज्ञातुं 'अयनक्षणमास.....' श्लोकः सहकृत् वर्तते ।

**२.८ ग्रहभुक्तांशकवशात् कालज्ञानम्**

बृहज्जातकस्य आयुर्दायाध्याये उक्तः अयं श्लोकः बहुभिः दैवज्ञैः दिनपरिज्ञाने स्वीक्रियते -

**ग्रहभुक्तनवांशराशितुल्यं बहुसाम्यं समुपैति सत्यवाक्यम् ।**[13]

प्रश्नकालिकलग्नाधिपग्रहस्य अथवा तत्प्रश्नसम्बद्धग्रहस्य भुक्तनवांशं स्वीकृत्य तेन प्रवासगतस्य जनस्य पुनरागमनदिनं वक्तुं पारयामः ।

**२.९ फलदायकग्रहवशात् कालज्ञानम्**

प्रश्नमार्गे ग्रहाणां फलप्राप्तिनिर्णये एकः विचारः विशदीकृतः -

**फलाप्तिः कल्प्यते येन तस्य कालो अनादिकः ।**

**तद्भुक्तांशकसङ्ख्याघ्नः तत्सिद्धौ समुदीर्यताम् ।।**[14]

प्रश्नचिन्तनक्रमे फलदायकग्रहस्य उक्तकालं भुक्तनवांशकसङ्ख्याभिः सङ्गुण्य, यत् फलितं लभ्यते तत्समये कार्यसिद्धिः सिद्ध्यति इति प्रवदेत् ।प्रोषितप्रश्नविषये तु प्रोषितसम्बद्धभावपतिद्वारा अथवा यात्राविषयकसप्तमाधिपतिद्वारा इदं चिन्तनं कर्तुं शक्यम् । उदाहरणार्थं प्रोषिप्रश्नस्य सप्तमाधिपतिस्थितराशिः रविः इति चिन्त्यताम् । रवेः भुक्तनवांशाः षट् सन्ति । 'अयनक्षणमास...' सूत्रानुसारं रविसूचितकालः अयनमस्ति । तदा पश्चायनान्तरं षष्ठायने प्रोषितः पुनरायाति इति वक्तव्यमिति भावना ।

**३ उपसंहारः**

एते च प्रकाराः प्रश्नशास्त्रे होराशास्त्रे च विवृताः वर्तन्ते । एते केवलं प्रोषितागमनविषये सहकुर्वन्ति किन्तु नष्टप्रश्नादिष्वपि । विशिष्य प्रोषितप्रश्ने, इमान् नियमान् मनसि निधाय दैवप्रेरणया प्रश्नकर्मणि दैवज्ञाः उद्युक्ताः भवन्ति चेत् दैवज्ञानां वाचं सत्या कुर्वन्ति निश्चप्रचम् ।

**आधारग्रन्थाः**


१.बृहज्जातकम्। (दशाध्यायीव्याख्योपेतम्) । वराहमिहिरः। श्रीसनातनभारतभारतीपाठशाला,मैसूरु।. २००

२. प्रश्नचन्डेश्वरः।दैवज्ञः रामकृष्णः।चौखम्बा सुरभारती प्रकाशनम्।-वाराणासी।२०१४

३. प्रश्नशिरोमणिः।पण्डितरुद्रमणिः।खेमराज श्रीकृष्णदासः। मुम्बयी २०१३

४.दैवज्ञवल्लभा।वराहमिहिरः।टि.एन् कृष्णय्यशेट्टि अंड् सन्।बेङ्गलूरु

५.प्रश्नमार्गः।कब्याडि श्रीनिवासाचार्य ज्योतिषी।कब्याडिमठः।उडुपी।१९८४

६. सारावली।श्रीकल्यानवर्मा।मोतिलाल् बनारस्दास।दिल्लि।१९७७


**संदर्भ**

1. प्रश्नसारसमुद्रः ४/१२४१,१२४२
2. प्रश्नचण्डेश्वरः ६/१३
3. दैवज्ञवल्लभा ४/८
4. प्रश्नचण्डेश्वरः ६/१४,१५
5. प्रश्नचण्डेश्वरः६/१६
6. बृहज्ज्ञातकम् ३/६
7. सारावली ४/१८
8. प्रश्नशिरोमणिः २/१
9. प्रश्नमार्गः १४/९
10. बृहज्ज्ञातकम् ३/८
11. प्रश्नमार्गः १४/८२
12. प्रश्नज्ञानप्रदीपः ११/२२७
13. बृहज्ज्ञातकम् ७/९
14. प्रश्नमार्गः१४/८१